॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ४१

स विसृज्य ततो रामः पुष्पकं हेमभूषितम् ।
प्रविवेश महाबाहुरशोकवनिकां तदा ॥ १॥

चन्दनागरु चूतैश्च तुङ्ग कालेयकैरपि ।
देवदारुवनैश्चापि समन्तादुपशोभिताम् ॥ २॥

प्रियङ्गुभिः कदम्बैश्च तथा कुरबकैरपि ।
जम्बूभिः पाटलीभिश्च कोविदारैश्च संवृताम् ॥ ३॥

सर्वदा कुसुमै रम्यैः फलवद्भिर्मनोरमैः ।
चारुपल्लवपुष्पाढ्यैर्मत्तभ्रमरसङ्कुलैः ॥ ४॥

कोकिलैर्भृङ्गराजैश्च नानावर्णैश्च पक्षिभिः ।
शोभितां शतशश्चित्रैश्चूतवृक्षावतंसकैः ॥ ५॥

शातकुम्भनिभाः के चित्के चिदग्निशिखोपमाः ।
नीलाञ्जननिभाश्चान्ये भान्ति तत्र स्म पादपाः ॥ ६॥

दीर्घिका विविधाकाराः पूर्णाः परमवारिणा ।
महार्हमणिसोपानस्फटिकान्तरकुट्टिमाः ॥ ७॥

फुल्लपद्मोत्पलवनाश्चक्रवाकोपशोभिताः ।
प्राकारैर्विविधाकारैः शोभिताश्च शिलातलैः ॥ ८॥

तत्र तत्र वनोद्देशे वैदूर्यमणिसंनिभैः ।
शाद्वलैः परमोपेताः पुष्पितद्रुमसंयुताः ॥ ९॥

नन्दनं हि यथेन्द्रस्य ब्राह्मं चैत्ररथं यथा ।
तथारूपं हि रामस्य काननं तन्निवेशितम् ॥ १०॥

बद्धासनगृहोपेतां लतागृहसमावृताम् ।
अशोकवनिकां स्फीतां प्रविश्य रघुनन्दनः ॥ ११॥

आसने तु शुभाकारे पुष्पस्तबकभूषिते ।
कुथास्तरणसंवीते रामः संनिषसाद ह ॥ १२॥

सीतां सङ्गृह्य बाहुभ्यां मधुमैरेयमुत्तमम् ।
पाययामास काकुत्स्थः शचीमिन्द्रो यथामृतम् ॥ १३॥

मांसानि च विचित्राणि फलानि विविधानि च ।
रामस्याभ्यवहारार्थं किङ्करास्तूर्णमाहरन् ॥ १४॥

उपनृत्यन्ति राजानं नृत्यगीतविशारदाः ।
बालाश्च रूपवत्यश्च स्त्रियः पानवशं गताः ॥ १५॥

एवं रामो मुदा युक्ता सीतां सुरुचिराननाम् ।
रमयामास वैदेहीम् अहन्यहनि देववत् ॥ १६॥

तथा तु रममाणस्य तस्यैवं शिशिरः शुभः ।
अत्यक्रामन्नरेन्द्रस्य राघवस्य महात्मनः ॥ १७॥

पूर्वाह्णे पौरकृत्यानि कृत्वा धर्मेण धर्मवित् ।
शेषं दिवसभागार्धमन्तःपुरगतोऽभवत् ॥ १८॥

सीता च देवकार्याणि कृत्वा पौर्वाह्णिकानि तु ।
श्वश्रूणामविशेषेण सर्वासां प्राञ्जलिः स्थिता ॥ १९॥

ततो राममुपागच्छद्विचित्रबहुभूषणा ।
त्रिविष्टपे सहस्राक्षमुपविष्टं यथा शची ॥ २०॥

दृष्ट्वा तु राघवः पत्नीं कल्याणेन समन्विताम् ।
प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत् ॥ २१॥

अपत्यलाभो वैदेहि ममायं समुपस्थितः ।
किमिच्छसि हि तद्ब्रूहि कः कामः क्रियतां तव ॥ २२॥

प्रहसन्ती तु वैदेही रामं वाक्यमथाब्रवीत् ।
तपोवनानि पुण्यानि द्रष्टुमिच्छामि राघव ॥ २३॥

गङ्गातीरे निविष्टानि ऋषीणां पुण्यकर्मणाम् ।
फलमूलाशिनां वीर पादमूलेषु वर्तितुम् ॥ २४॥

एष मे परमः कामो यन्मूलफलभोजिषु ।
अप्येकरात्रं काकुत्स्थ वसेयं पुण्यशालिषु ॥ २५॥

तथेति च प्रतिज्ञातं रामेणाक्लिष्टकर्मणा ।

विस्रब्धा भव वैदेहि श्वो गमिष्यस्यसंशयम् ॥ २६ ॥

एवमुक्त्वा तु काकुत्स्थो मैथिलीं जनकात्मजाम् ।
मध्यकक्षान्तरं रामो निर्जगाम सुहृद्वृतः ॥ २७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com